කොළඹ විශ්වවිද්‍යාලය

ශාස්ත්‍ර පීඨය

ශාස්ත්‍රවේදී උපාධි දෙවන වසර පරීක්ෂණය

දෙවන සෙමෙස්තරය - 2017/2018

**BST 2229 (S) – උසස් පාලි/සංස්කෘත භාෂාව**

(පැ දෙකයි)

පළමු හා දෙවන ප්‍රශ්න ඇතුළුව ප්‍රශ්න **හතරකට (04) පමණක්** පිළිතුරු සපයන්න.

---

1. පහත සඳහන් ඡේදය සිංහලට නගන්න.

तेन खलु पुनः कालेन तेन समयेन राजगृहे महानगरे रुचिरकेतुर्नाम बोधिसत्वः महासत्वः प्रतिवसति पूर्वजिनकृताधिकारोऽवरोपितकुशलमूलो बहुबुद्धकोटिनियुतशतसहस्रपर्युपासितः। तस्यैतदभवत् को हेतुः कः प्रत्ययो यद्भगवतः शाक्यमुनेरेवं परीत्तमायुः प्रमाणं यदुताशीतिवर्षाणीति।

पुनस्तस्यैतदभवत् उक्तं चैव भगवता द्वौ हेतू द्वौ च प्रत्ययौ दीर्घायुष्कतायाम् कतमौ द्वौ प्राणातिपातविरमणं भोजनप्रदानं च। अथ बहून्यसंख्येयकल्पकोटिनियुतशतसहस्राणि भगवाञ्छाक्यमुनिः प्राणातिपातविरतो बभूव। यावद्दशकुशलकर्मपथ समादापयेत् तावद्भगवता भोजनमाध्यात्मिकं बाह्यानि च वस्तूनि सत्त्वानां परित्यक्तानि। अन्तशः स्वशरीरमांसरुधिरास्थिमज्जया बुभुक्षिताः सत्त्वाः संतर्पिताः प्रागेवान्येन भोजनेन।

2. පහත සඳහන් ශ්ලෝක සිංහලට නගන්න.

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।
सर्वस्य लोचनं शास्त्रम् यस्य नास्त्यन्ध एव सः ॥१॥
कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः।
काणेन चक्षुषा किम्वा चक्षुः पीडैव केवलम् ॥२॥
दाने तपसि शौर्ये च यस्य न प्रथितं मनः।
विद्यायामर्थलाभे च मातुरुच्चार एव सः ॥३॥
मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः।
तावच्च शोभते मूर्खो यावत् किंचिन्न भाषते ॥४॥
अवश्यं भाविनो भावाः भवन्ति महतामपि।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥५॥

3. ඡේදය ඇසුරෙන් පහත සඳහන් ප්‍රශ්නවලට පිළිතුරු සපයන්න.

एवं मया श्रुतम्। एकस्मिन् समये भगवान् राजगृहे विहरति स्म गृध्रकूटे पर्वते महता भिक्षुसंघेन सार्धमर्धत्रयोदशाभिर्भिक्षुसहस्रैः संबहुलैश्च बोधिसत्त्वमहासत्त्वैः। अथायुष्मान् शारिपुत्रो येन मैत्रेयस्य बोधिसत्त्वस्य महासत्त्वस्य चंक्रमः तेनोपसमक्रमीत्। उपसंक्रम्य अन्योन्यं संमोदनीयां कथां बहुविधां व्यतिसारयित्वा उभौ शिलातले उपाविशताम्॥

अथायुष्मान् शारिपुत्रो मैत्रेयं बोधिसत्त्वं महासत्त्वमेतदवोचत् - अद्यात्र शालिस्तम्बमवलोक्य मैत्रेय भगवता भिक्षुभ्यः सूत्रमिदमुक्तम् - यो भिक्षवः प्रतीत्यसमुत्पादं पश्यति स धर्मं पश्यति। यो धर्मं पश्यति स बुद्धं पश्यति। इत्युक्त्वा भगवांस्तूष्णीं बभूव। अथ मैत्रेय सुगतोक्तसूत्रान्तस्य अर्थः कथमः प्रतीत्यसमुत्पादः कतमः धर्मः कतमः बुद्धः कतमः कथं प्रतीत्यसमुत्पादं पश्यन् धर्मं पश्यति कथं धर्मं पश्यन् बुद्धं पश्यति।

i. මෙහි සඳහන් භික්ෂූන්ගේ සංඛ්‍යාව කොපමණ ද?

ii. ශාරිපුත්‍ර තෙරුන් එළඹුණේ කවුරුන් වෙතට ද?

iii. ශාරිපුත්‍ර තෙරුන් සහ මෛත්‍රෙය බෝසතුන් වැඩහුන්නේ කොහි ද?

iv. මෙහි විවරණය වන ධර්මපර්යාය කුමක් දැයි දක්වන්න.

v. රාජගෘහෙ, ගෘධ්‍රකූට, ව්‍යතිසාරයිත්වා, උපසංක්‍රම්‍ය, ආයුෂ්මාන් යන සංස්කෘත පදවලට පර්යාය පාලි රූප දක්වන්න.

4. कर्तृ සහ बुद्धि යන ශබ්ද සියලු විභක්තිවල සම්පූර්ණයෙන් වරනගන්න.

5. दृश् । नी । යන ධාතු लट् । लोट् । अनद्यतनातीत लङ् යන ලකාරයන්හි පරස්මෛපදයේ පමණක් වරනගන්න.

*******************